# संस्कृत वार्ता:

दिनाङ्क : 17/03/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- षट्चत्वारिंशत्-सहस्रं मीट्रिक-टन्परिमितं द्रवीकृत-पेट्रोलियम-वातेन्धनं परिवहन् भारतीय-मालवाहक-पोतः नन्दा-देवी अद्य प्रातः कतर-देशात् प्रस्थाय, गुजरातस्य वाडिनार-पोताश्रयं सुरक्षिततया प्राप्तवान्।
- प्रशासनेन लोकसभायां सूचितं यत् पश्चिम-एशियायां जायमानस्य सङ्कटस्य सत्त्वेऽपि भारतस्य आर्थिक-स्थितिः सुदृढा वर्तते।
- लोकसभया अद्य विपक्षस्य अष्ट-सदस्यानां निलम्बनं निराकृतम्।
- राष्ट्रपतिपदासीना द्रौपदीमुर्मूः अद्य प्रतिपादितवती यत् सर्वकारस्य प्रधानमन्त्री-पोषण-शक्ति-निर्माण-योजनायाः अन्तर्गतं बालकेभ्यः प्रदीयमानं पौष्टिक-भोजनम्, वस्तुतः देशस्य मानव
- काबुल-चिकित्सालये पाकिस्तानस्य वायु-प्रहारः अफ़ग़ानिस्तानस्य संप्रभुतायाः उपरि साक्षात्-प्रहारः वर्तते इति भारतेन प्रतिपादितम्।

---------------------------------

<u>पश्चिम-एशिया</u>

पश्चिम-एशियायां वर्धमानस्य अवसादस्य मध्ये, षट्चत्वारिंशत्-सहस्रं मीट्रिक-टन्परिमितं द्रवीकृत-पेट्रोलियम-वातेन्धनं परिवहन् भारतीय-मालवाहक-पोतः नन्दा-देवी अद्य प्रातः कतर-देशात् प्रस्थाय, होर्मुज-जलडमरूमध्यं पारं कृत्वा गुजरात-राज्यस्य देवभूमि-द्वारका-मण्डले स्थितं वाडिनार-पोताश्रयं सुरक्षिततया प्राप्तवान्।

दीनदयाल-पोर्ट-अथॉरिटी इत्यस्य अध्यक्षः सुशील-कुमार-सिंहः वाडिनार-नगरे एकस्य विशालस्य शिप-टू-शिप इति एल.पी.जी. स्थानान्तरण-अभियानस्य आरम्भं घोषितवान्। श्री-

सिंहः अवदत् यत् नन्दा-देव्यां विद्यमानः एलपीजी लघु-पोतेषु स्थानान्तरितः भविष्यति, येन सः तमिलनाडु-राज्यस्य एन्नोर तथा पश्चिम-बङ्गालस्य हल्दिया पर्यन्तं प्रेषयितुं शक्येत्।

उल्लेखनीयं वर्तते यत् ह्यः एव कतर-देशात् एल.पी.जी. नीत्वा आगतः अन्यः भारतीय-पोतः शिवालिकः अपि गुजरातस्य मुन्द्रा-पोताश्रयं सुरक्षितं प्राप्तवान्। एताभ्यां द्वाभ्यां खेपाभ्यां देशस्य वातेन्धन-भण्डारस्य सुदृढीकरणार्थं महती सहायता मिलिष्यति। अपि च, एकाशीति-सहस्र-टन्-परिमितं अपरिष्कृत-तैलं वहन् अन्यः भारतीय-पोतः जग-लाडकी अपि भारतं प्रति प्रस्थितः अस्ति।

---------------------------------

<u>मन्त्रालयः</u>

पत्तन-पोत-परिवहन-जलमार्ग-मन्त्रालयस्य विशेष-सचिवः राजेश-कुमार-सिन्हा अद्य सूचितवान् यत् उपत्यकायां सर्वे भारतीय-नाविकाः मालवाहक-पोताश्च पूर्णतः सुरक्षिताः सन्ति। श्री-सिन्हा नवदिल्ल्यां पश्चिम-एशियायाः सद्यः जातस्य घटनाक्रमस्य विषये आयोजितां अन्तर्मन्त्रालयीय-वृत्तान्तं सम्बोधयन् एतत् विज्ञापितवान्। सः अवदत् यत् विगत-चतुर्विंशति-होरासु उपत्यकाक्षेत्रे स्वकार्यं सम्पाद्य एकषष्ट्यधिकैकशतं भारतीय-नाविकाः सुरक्षितं भारतं प्रत्यागताः।

वृत्तान्त-सत्रं सम्बोधयन्ती पेट्रोलियम-प्राकृतिक-गैस-मन्त्रालयस्य संयुक्त-सचिवः सुजाता-शर्मा अद्य उक्तवती यत् सम्पूर्णे देशे पेट्रोल-डीजल-इन्धनयोः पर्याप्तं भण्डारं विद्यते। सुजाता-शर्मा अधिकं स्पष्टीकृतवती यत् सर्वकारः वाणिज्यिक-एल.पी.जी. उपभोक्तृन् पाइप्ड-नेचुरल-गैस इति अङ्कीय-प्राकृतिक-वायुं प्रति स्थानान्तरणाय निरन्तरं प्रयासं करोति।

---------------------------------

<u>आधार-प्रमाणीकरणम्</u>

सर्वकारेण स्पष्टीकृतं यत् एल.पी.जी. बायोमेट्रिक-आधार-प्रमाणीकरणम् केवलं तेभ्यः ग्राहकेभ्यः अनिवार्यं वर्तते, येषाम् अद्यापि प्रमाणीकरणं न जातम्। पेट्रोलियम-प्राकृतिक-गैस-मन्त्रालयेन सामाजिक-सञ्जालीय-माध्यमेन सूचितं यत् एषः कोऽपि नूतन-निर्देशः नास्ति, अपितु सर्वकारस्य तस्य अभियानस्य भागः अस्ति, येन अधिकाधिक-ग्राहकाः आधार-प्रमाणीकरणाय प्रोत्साहिताः

क्रियन्ते। ये ग्राहकाः प्रधानमन्त्री-उज्ज्वला-योजनायाः अन्तर्गतं न आगच्छन्ति तथा च ये पूर्वमेव एतां प्रक्रियां पूर्णवन्तः, तेभ्यः पुनः प्रमाणीकरणस्य आवश्यकता नास्ति।

प्रधानमन्त्री-उज्ज्वला-योजनायाः ग्राहकेभ्यः एषा प्रक्रिया प्रत्येकस्मिन् वित्तीय-वर्षे केवलं एकवारं करणीया भविष्यति। सा च तदैव अनिवार्या, यदा सप्त-वारं रिफिल इति प्राप्त्यनन्तरं अष्टमे नवमे च रिफिल-समये लक्षित-प्रत्यक्ष-लाभ-अन्तरण इति योजनायाः अनुदानं प्राप्तव्यं स्यात्। एल.पी.जी. ग्राहकाणां मध्ये प्रचलितानां भ्रान्त-सूचनानां निराकरणार्थं सर्वकारेण एतत् स्पष्टीकरणं निस्सारितम्।

----------------------------------

<u>पीयूष-गोयल</u>

वाणिज्य-उद्योग-मन्त्री पीयूष-गोयलः उक्तवान् यत् पश्चिम-एशियायां जायमानस्य सङ्कटस्य सत्त्वेऽपि भारतस्य आर्थिक-स्थितिः सुदृढा वर्तते। अद्य लोकसभायां प्रश्नकालावधौ पूरक-प्रश्नानां उत्तरं प्रयच्छन् श्री-गोयलः अवदत् यत् भारतेन सह व्यापारिक-सम्बन्धान् सुदृढीकर्तुं विश्वस्मिन् उत्साहः संवर्धते। सः विश्वासं प्रकटितवान् यत् मार्चमासस्य अन्त्य-पर्यन्तं भारतं स्वकीयं निर्यातस्तरं यथापूर्वं स्थापयितुं साफल्यम् अवाप्स्यति।

----------------------------------

<u>लोकसभया- निलम्बनं</u>

लोकसभया अद्य विपक्षस्य अष्ट-सदस्यानां निलम्बनं तदा निराकृतम्, यदा सदने एतत्सम्बद्ध-प्रस्तावः सर्वसम्मत्या पारितः। एषः प्रस्तावः संसदीय-कार्यमन्त्रिणा किरेन-रिजिजू इत्यमुना प्रस्तुतम्, यस्मिन् सदस्यानां निलम्बनं तत्काल-प्रभावेण समापयितुं प्रार्थना कृता आसीत्। एतेषु सदस्येषु कांग्रेस-दलस्य माणिकम्-टैगोरः, अमरिन्दर-सिंह-राजा-वारिंगः, गुरजीत-सिंह-औजला, हिबी-ईडेनः, डीन-कुरियाकोसः, प्रशान्त-पाडोले, एवं किरण-कुमार-रेड्डी, तथा च सी.पी.आई-एम-दलस्य एस-वेङ्कटेशन् इत्येते सम्मिलिताः आसन्।

अध्यक्षः ओम्-बिरला महोदयः अवोचत् यत् ह्यः लोकसभायाः विभिन्न-दलानि फ्लोर-लीडर्स इति मन्त्रणायाम् संसदः परम्पराणां पालनेन सह सदनस्य गरिमां मर्यादां च रक्षयितुं स्व-प्रतिबद्धतां पुनः प्रकटीकृतवन्तः। सदने श्री-रिजिजू इत्येषः अवदत् यत् सर्वकारः अस्याः समस्यायाः समाधानार्थं विपक्षेण सह वार्तालापाय सदैव सज्जः वर्तते, यदि विपक्षी-सदस्याः उत्तरदायित्वपूर्ण-रीत्या चर्चां कर्तुम् इच्छन्ति।

श्री-रिजिजूः एतं प्रस्तावं तदा उपस्थापितवान्, यदा कांग्रेस-दलस्य मुख्य-सचेतकः के. सुरेशः कतिपयैः सदस्यैः अनवधानेन कृतायाः अनुशासनहीनतायाः कृते खेदं प्रकटितवान्। अत्रावधेयमिदं यत् विगत-मासस्य तृतीये दिनाङ्के, सदने अमर्यादित-व्यवहार-कारणात् अष्ट-विपक्ष-सांसदाः आय-व्ययक-सत्रस्य अवशिष्ट-भागाय निलम्बिताः।

----------------------------------

## राष्ट्रपति

राष्ट्रपतिपदासीना द्रौपदीमुर्मूः अद्य प्रतिपादितवती यत् सर्वकारस्य प्रधानमन्त्री-पोषण-शक्ति-निर्माण-योजनायाः अन्तर्गतं बालकेभ्यः प्रदीयमानं पौष्टिक-भोजनम्, वस्तुतः देशस्य मानव-सम्पत्तौ एकः महत्वपूर्णः निवेशः वर्तते। राष्ट्रपतिः नवदिल्ल्यां अक्षय-पात्र-फाउण्डेशन इति संस्थया आयोजितं एकं विशेष-कार्यक्रमं सम्बोधयन्ती आसीत्।

----------------------------------

## अफगान-आक्रमणम्

भारतेन गतरात्रौ काबुल-नगरे उमीद-एडिक्शन-उपचार-चिकित्सालये पाकिस्तान-देशस्य वायवीय-आक्रमणस्य तीव्रनिन्दा कृता, यस्मिन् चतुःशताधिकानां निर्दोषजनानां मृत्युः अभवत्। विदेश-मन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः एकस्मिन् वक्तव्ये अवदत् यत् हिंसायाः एतत् कातरपूर्णम् अमानवीयञ्च कृत्यं येन चिकित्सालयसदृशे स्थाने बृहत्संख्यायां सामान्य-नागरिकाणां प्राणाः अपहृताः कदापि सैन्य-लक्ष्यम् इति रूपेण न समर्थयितुं शक्यते।

सः अग्रे अवदत् यत् पाकिस्तानः सम्प्रति एतं नरसंहारं सैन्य-अभियानस्य रूपं दातुं प्रयतते। प्रवक्तुः अनुसारं पाकिस्तानस्य एतत् घृणितम् आक्रमणम् अफ़ग़ानिस्तानस्य सार्वभौमिकतायाः

उपरि प्रत्यक्षप्रहारः अस्ति, यत् क्षेत्रस्य शान्ति-स्थिरताभ्यां कृते साक्षात् सङ्कटः वर्तते। प्रवक्त्रा सूचितं यत् एतत् आक्रमणं रमज़ान-मासस्य पवित्र-समये कृतम्, येन एतत् अधिकं निन्दनीयं भवति। सः अन्ताराष्ट्रिय-समुदायं प्रति आह्वानं कृतवान् यत् एतस्य आपराधिक-कृत्यस्य दोषिणः उत्तरदायिनः भवेयुः।

।। इति वार्ता: ।।